Concept of the Samjna
5th Sem, CC 12

• घि — शेषो घ्यसखि (१/४/७)

इदं संज्ञासूत्रम्। शेषः प्रथमान्तं, घि प्रथमान्तम् असखि प्रथमान्तं त्रिपदात्मकं सूत्रम्। न सखि असखि इति नञ्‌तत्पुरुष समासः। 'ह्रिति ह्रस्वश्च' इति सूत्रात् ह्रस्वपदमनुवर्तते। 'यूस्त्र्याख्यौ नदी' सूत्रात् यू इति पदमनुवर्तते। इः च उः च यू इति इतरेतरयोग द्वन्द्वसमासः। शेषः पदार्थः अवशिष्टः "उक्तादन्यः शेषः" इति वा कथ्यते। ह्रस्व इदन्तं सखिशब्दं वर्जयित्वा तथा नदीसंज्ञकं ई-कारान्तं ऊ-कारान्तं शब्दं च वर्जयित्वा अत्र शेषः शब्दः ग्राह्यः। परन्तु कः सः शेषः इति चेत, उच्यते इदं व्याकरणं शब्दशास्त्रम् अतः शब्दशास्त्रस्य प्रस्तावः, विषयः अस्ति, अतः शब्दौ इति पदम् आक्षिप्यते। किञ्च असखि ह्रस्वः शेषः यू इति विशेषणम् अस्ति, शब्दौ इति विशेष्यम् अस्ति। अतः तदन्तविधिना तथा सखिभिन्नः शेषः शब्दः ग्राह्यं, यस्य अन्ते ह्रस्वः इकारः अस्ति ह्रस्वः उ-कारश्च अस्ति। उदाहरणम् — मुनि, हरि, विष्णु।

• नदी — यूस्त्र्याख्यौ नदी (१/४/३)

संज्ञा सूत्रमिदम्। यू इति प्रथमा द्विवचनान्तम्, स्त्र्याख्यौ इति प्रथमा द्विवचानन्तम्। नदी इति प्रथमैक वचनान्तम्, त्रिपदात्मकं सूत्रम्।

ई च ऊ च इति यू इतरेतरयोगद्वन्द्व समासः। स्त्रियाम् आचक्षते इति स्त्र्याख्यौ। अस्मिन् सूत्रे तदन्तविधिः भवति। यथा यू इति विशेषणम्। कस्य विशेषणम्? स्त्र्याख्ययोः अर्थात् स्त्रीलिङ्गयोः। कौ तौ? व्याकरणम् शब्दशास्त्रम्। अतः शब्दशास्त्रस्य प्रस्तावः विषयः अस्ति, अतः शब्दौ इति पदम् आक्षिप्यते। अधुना यू इति विशेषणम्, शब्दौ इति विशेष्यम् विशेषणं तदन्तस्य संज्ञा भवति। अतः तादृशौ शब्दौ अत्र ग्राह्यौ ययोः अन्ते यू भवतः। अर्थात् ईदन्तः = ई-कारान्तः शब्दः, ऊदन्तः = ऊ-कारान्तश्च शब्दः ग्राह्याः। सूत्रार्थो भवति ईदन्तः ऊदन्तश्चेति

नित्यस्त्रीलिङ्गिनौ शब्दौ नदी संज्ञकौ भवतः। उदाहरणम् – नदी, गौरी, वधू।

• उपधा – अलोऽन्त्यात्पूर्व उपधा (१।१।६५)

इदं संज्ञासूत्रम्। प्रथमाध्यायान्तर्गतप्रथमपादस्य पञ्चषष्ठिसंख्यकं सूत्रम्। अलः इति पञ्चम्यन्तं पदं; अन्त्यात् इति पञ्चम्येकवचनान्तं पदं; पूर्वः इति प्रथमान्तं पदम्, उपधा इति प्रथमान्तं संज्ञापदम्। अनेकपदमिदं सूत्रम्। अन्ते भवः अन्त्यः अल् इति प्रत्याहारः, अर्थः वर्ण पर्यायः इत्युक्तः सर्वे वर्णाः बोद्धव्याः। अलः अन्त्याद् इति द्वयोः पदयोः समानाधिकरणयम्, अर्थात् द्वयोः पदयोः विभक्तिः समाना, अतएव अन्त्याद् इति अलः इत्यस्य विशेषणम्। एवञ्च सूत्रार्थो भवति अन्त्यात् अलः पूर्वः अव्यवहितः अल् उपधासंज्ञं भवति। उपान्त्यः वर्णः उपधासंज्ञकं भवतीति भावः। अन्त्यः अपि अल् एव न तु अल् समुदायः ततः पूर्ववर्ती अपि अल् अर्थात् एकः एव वर्णः न तु वर्णसमुदायः; तस्य उपधासंज्ञा भवति। वर्णसमुदायस्य उपधासंज्ञा न भवति।

उदाहरणम् – शमाद् इत्यत्र श् + आ + म् + आ + द् इति वर्णाः सन्ति, अत्र अन्त्यः अल् भवति द् वर्णः। ततः पूर्वः अल् भवति आ-कारः। तस्य आलोच्यसूत्रेण उपधासंज्ञा भवति।

---